ISSN 2229 - 3337
UGC CARE Listed

Journal of Sukṛtīndra Oriental Research Institute

Half-yearly Indological Research Journal

October 2023 • Vol. 25 • No. 1

Editor
Dr. V. Nithyanantha Bhat



यज्ञं दधे सरस्वती

SUKṚTĪNDRA ORIENTAL RESEARCH INSTITUTE
(Research Centre recognised by the University of Kerala
and Mahatma Gandhi University.)
Kuthapady, Thammanam, Kochi-682 032, Kerala, India.

ISSN 2229 - 3337
UGC CARE Listed

Journal of Sukṛtīndra Oriental Research Institute

Half-yearly Indological Research Journal

October 2023  Vol. 25  No. 1

Editor
Dr. V. Nithyanantha Bhat



SUKṚTĪNDRA ORIENTAL RESEARCH INSTITUTE
(Research Centre recognised by the University of Kerala
and Mahatma Gandhi University)
Kuthapady, Thammanam, Kochi - 682 032, Kerala, India

Journal of Sukṛtīndra Oriental Research Institute

A Half Yearly Indological Research Journal

UGC CARE Listed & Peer Reviewed Journal

Editor : Dr. V. Nithyanantha Bhat

Journal of Sukṛtīndra Oriental Research Institute *is published twice a year (October and April). It aims to promote studies in Oriental learning, in particular Indological subjects. The journal is published in English and Sanskrit.*

Subscription Rates

	India	Outside India
Annual (2 Issues)		
Individuals	Rs. 400	US $ 40
Institutions	Rs. 600	US $ 60
Back Issues Per Copy		
Individuals	Rs. 225	US $ 25
Institutions	Rs. 300	US $ 30

* Subscription Amount may be paid by DD/Cheque/Online
in favour of Sukrtindra Oriental Research Institute

ISSN 2229-3337

Articles/Research papers invited

Standard articles (original and unpublished) written in error-free language (Sanskrit / English) and prepared according to proper research methodology as in MLA Handbook for Writers of Research Papers on topics of Indological/ Oriental importance are invited. Manuscripts should be neatly typed in double space with correct diacritical marks wherever necessary. Correctness of details of works referred should be verified. Short articles are preferred.

Contributions should be sent to the Editor – one copy along with the font used should be mailed to "sukrtindra@gmail.com" and one hard copy should be sent to the Editor by post.

Send your subscriptions / articles / orders to:

Editor,
Journal of Sukṛtīndra Oriental Research Institute,
Kuthapady, Thammanam, Cochin - 682 032, Kerala, India.
Phone : 0484-2349563 • E-mail : sukrtindra@gmail.com
Website : www.sukrtindraoriental.org

Journal of Sukṛtīndra Oriental Research Institute

Contributors

Dr. Balagopalan T.S. Prabhu : Former Professor, Dept. of Architecture, Regional Engineering College, Calicut; Founder Director, Vastuvidyapratishthanam, Calicut.

Prof. Gauri Mahulikar : Academic Director, Chinmaya International Foundation, Ernakulam.

Dr. Birendra Nath Prasad : Assistant Professor, Centre for Historical Studies, Jawaharlal Nehru University, New Delhi - 110 067.

Dr. N. Usha Devi : Professor of Sanskrit (Retd.), Sree Sankara College, Kalady.

Dr. N.A. Shihab : Assistant Professor, Department of Sanskrit, University of Calicut, Thenhipalam - 673 635.

Dr. Sajna S. : Asst. Professor, Dept of Sanskrit, University College, M.G. Road, Palayam, Thruvananthapuram - 695 034.

Reshma N.S. : Research Scholar (UGC-SRF), University College, M.G. Road, Palayam, Thruvananthapuram - 695 034.

Dr. Pooja N. : SDM College of Ayurveda, Udupi, Karnataka.

Dr. Dhananjay Vasudeo Dwivedi : Assistant Professor, Department of Sanskrit, Dr. Shyama Prasad Mukherjee University, Ranchi.

Dr. Sreegith T. G. : Assistant Professor, Dept. of Sanskrit, KSMDB College, Sasthamcotta, Kollam - 690 521

श्रीमद्देवीभागवतमहापुराणे प्रतिपादितं धर्मस्य पादचतुष्टयम्

डा. धनञ्जय वासुदेव द्विवेदी

धारणार्थकात् 'धृ' धातोः 'मन्' प्रत्यये कृते सति धर्मशब्दः सिद्ध्यति। महाभारतानुसारं जगद्धारकतत्त्वानि एव धर्माः। वस्तुतो यानि तत्त्वानि अथवा ये सार्वभौमसिद्धान्ताः जगत् धारयन्ति त एव धर्माः। धर्मेणैव मानवो मानवतामुपैति। यदि मानवे मानवतैव नास्ति तदा नास्ति स मानवः। धर्महीनो हि मानवः पशुर्मन्यते। आहारनिद्राभयमैथुनादिकं तु मनुष्येषु पशुषु चोभयोरपि सामान्यमेव। अस्ति खलु कश्चिद् विशिष्टो भावः यो हि मानवं पशोर्विशिनष्टि सोऽयं धर्म एव।

श्रुतिप्रतिपादितधर्मस्य व्याख्यां कुर्वन् श्रीमद्देवीभागवतं कथयति यद् धर्मस्य चत्वारः पादाः भवन्ति-सत्यं शौचं दया दानञ्चेति। एतैर्विना धर्मस्य स्थितिरसम्भवास्ति-

धर्मस्य प्रथमः पादः सत्यमेतच्छ्रुतेर्वचः।
द्वितीयस्तु तथा शौचं दया पादस्तृतीयकः।।
दानं पादश्चतुर्थश्च पुराणज्ञा वदन्ति वै।
तैर्विहीनः कथं धर्मस्तिष्ठेदिह सुसम्मतः।।[1]

सत्यं तु धर्मस्य मूलमेवास्ति।[2] सत्यं च तदस्ति येन प्राणिनां पीडा हानिश्च

न स्यात्। तत्सत्यं सत्यं नास्ति यद् हिंसान्वितमस्ति। दयायुक्तमनृतमपि सत्यमेव। येन नराणां हितं भवति तदेव सत्यम्।[३]

जगति सत्यमेवेश्वरोऽस्ति सत्यमेव धर्मस्याधारोऽस्ति। इदमेव सर्वस्य मूलमस्ति। सत्यात् किमपि उत्कृष्टं पदं नास्ति। तपसो दानस्य यज्ञादीनाञ्चाश्रयः सत्यमेव। तस्मात् सदा सत्यस्यावलम्बनं कर्तव्यम्-

सत्यमेवेश्वरो लोके सत्ये धर्मः सदाश्रितः।
सत्यमूलानि सर्वाणि सत्यान्नास्ति परं पदम्।।
दत्तमिष्टं हुतं चैव तप्तानि च तपांसि च।
वेदाः सत्यप्रतिष्ठानास्तस्मात्सत्यपरो भवेत्।।[४]

धर्मस्य द्वितीयः पादः शौचम्। कस्यापि धार्मिककृत्यसम्पादनार्थं सर्वविधपवित्रता प्रथमा आवश्यकता वर्तते। शुभकर्मसम्पादने मनसः शुद्धिर्नितरामावश्यकी। अत एव धार्मिककर्मप्रारम्भात् प्रागेवोच्यते- ॐ अपवित्रः पवित्रो वा सर्वावस्थाङ्गतोऽपि वा यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः। शुभकर्मसम्पादने मनसः शुद्धिः नितरामावश्यकी। अत्र श्रुतिः कथयति-

यत्प्रज्ञानमुत चेतो धृतिश्च यज्ज्योतिरन्तरमृतं प्रजासु।
यस्मान्न ऋते किंचन्कर्म क्रियते तन्मे मनः शिवसङ्कल्पमस्तु।।

यस्य मनो सर्वथा विमलं भवति स एव शुभकर्मानुष्ठास्य सम्यक्फलमाप्नोति। कलुषितमनसा यत्कर्मसम्पाद्यते तस्य यथार्थफलं नैवावाप्यते-

मनोऽतिनिर्मलं यस्य स सम्यक्फलभाग्भवेत्।।
तस्मिन् विकारयुक्ते तु न यथार्थफलं लभेत्।[५]

कस्मिन्नपि कर्मणि अर्थस्यावश्यकता भवति। द्रव्यं विना किमपि कर्तुं न शक्यते। अतो द्रव्यशुद्धिरपि परमावश्यकी अस्ति। शुभकर्मसम्पादनस्य तदैव वाञ्छितफलमवाप्यते यदा तत्कर्म न्यायार्जितेन अद्रोहेणार्जितेन च द्रव्येण सम्पाद्यते। द्रोहेणार्जितेन द्रव्येण यत् शुभकर्म सम्पाद्यते तेन विपरीतमेव फलम्-

प्रथमं द्रव्यशुद्धिश्च द्रष्टव्या विबुधैः किल।।
अद्रोहेणार्जितं द्रव्यं प्रशस्तं धर्मकर्मणि।
द्रोहार्जितेन द्रव्येण यत्करोति शुभं नरः।।
विपरीतं भवेत्तत्तु फलकाले नृपोत्तम।[६]

शुभकर्मसम्पादने आचार्याणाम् ऋत्विजादीनामपि शुद्धिः परमावश्यकी अस्ति। यदि तेऽपि अपवित्रा भवेयुः तत्कर्मणः यथाफलं नैवावाप्यते। अतस्तेऽपि विमलमनसः स्युः। एवमेव देशकालक्रियादीनामपि शुद्धिरावश्यकी। स्वाभिवृद्ध्यै शत्रूणां नाशमुद्दिश्य यत्कर्मसम्पाद्यते तत्कर्मणोऽपि अन्तिमपरिणामो विपरीत एव विलोक्यते-

कर्तारः कर्मणां सर्वे आचार्यऋत्विजादयः।।
स्युः विशुद्धमनसस्तदा पूर्णं भवेत्फलम्।
देशलकालक्रियाद्रव्यकर्तृणां शुद्धता यदि।।
मन्त्राणां च तदा पूर्णं कर्मणां फलमश्नुते।
शत्रुनाशमुद्दिश्य स्ववृद्धिं परमां तथा।।
करोति सुकृतं तद्वद्विपरीतं भवेत्किल।[७]

अस्माकं संस्कृतौ सदाचारस्य सर्वाधिकमहत्त्वपूर्णस्थानमस्ति। सदाचारी सर्वत्र समाद्रियते सदाचारविमुखश्च विद्वानपि निन्द्यते। षड्भिरङ्गैरधीता अपि वेदा आचारहीनं न पुनन्ति। एतादृशमाचारभ्रष्टं जनं मृत्युकाले अधीनानि छन्दांसि तथैव परित्यजन्ति यथा समुपजातपक्षाः पक्षिणो नीडमुत्सृजन्ति-

आचारहीनं न पुनन्ति वेदा यदप्यधीताः सह षड्भिरङ्गैः।
छन्दांस्येनं मृत्युकाले त्यजन्ति नीडं शकुन्ता इव जातपक्षाः।।[८]

ब्राह्मे मुहूर्ते उत्थाय सर्वैः सदाचारस्य पालनं कर्तव्यं रात्रेरन्तिमयामे वेदाभ्यासः करणीयः। पुनः किञ्चित्कालमिष्टदेवतायाश्चिन्तनं करणीयम्। एतेन मनुष्यो जीवन्मुक्तः सञ्जायते।[९] परन्तु अत्रापि स्मरणीयमिदमस्ति यद् बाह्याभ्यन्तरशुद्धिः सदाचारस्य प्रधानमङ्गमस्ति। तद्विना सदाचारस्य किमपि महत्त्वं नास्ति। अत एवास्माकं श्रीमद्भागवतं सदाचारस्य विशदनिरूपणेन सहैव बाह्याभ्यन्तरशुद्धैरपि विस्तृतविधिं विवृणोति। मलमूत्रस्य कुत्र कथं च त्यागः करणीयः पात्रादीनां मार्जनं कथं करणीयं पदप्रक्षालनस्य दन्तधावनस्य स्नानस्य च किं महत्त्वमस्तीति सर्वं विशदं निरूपितमस्त्यस्माकं पुराणे।[१०] अस्नातस्य पुरुषस्य सर्वाः शुभा अपि क्रियाः विफलाः सञ्जायन्ते। तस्मात् प्रतिदिनं प्रातःकाले स्नानं करणीयम्-

अस्नातस्य क्रियाः सर्वा भवन्ति विफला यतः।
तस्मात्प्रातश्चरेत्स्नानं नित्यमेव दिने दिने।।[११]

श्रीमद्देवीभागवते निरूपितः शौचस्य विधिः वैज्ञानिकः। वस्तुतो यावत्कालं शास्त्रोक्तविधिना शरीरस्य शुद्धिर्न क्रियते तावत्कालं मनः स्वस्थं भवितुं नार्हति। मलिनमनसि कुत्सितवासनानामसद्विचाराणामाविर्भावो भवति।

धर्मस्य तृतीयः पादो दया। इह खल्वव्याहतपरिवृत्तिशालिनि जगति कस्यापि सर्वदैकावस्थायामेवावस्थितिर्नितरामसम्भवा। रात्रिदिवसयोरिव सुखदुःखयोः समुपस्थितिः कस्याविदिता। महाशक्तिसम्पन्ना लोकोत्तरप्रभावसंयुक्ता अपि सुखदुःखपर्यायनियमतिक्रमितुमशक्ताः। अतः संकटापन्नेषु जनेषु आर्तानामार्तिनाशने यत्पुण्यं भवति तद् यज्ञादीनामनुष्ठानेनापि भवितुं नार्हति। भयभीतानां दीनानामुपकारेण यत्पुण्यमवाप्यते तत्केनाप्यन्यकर्मणा नहि-

आर्तस्य रक्षणे पुण्यं यज्ञाधिकमुदाहृतम्।
भयत्रस्तस्य दीनस्य विशेषफलदं स्मृतम्।।[१२]

अतः सन्तः सततं दयालवो भवन्ति। महान्तो हि दयालवः।[१३] महान्तो जनाः करुणावरुणालयाः भवन्ति। करुणागारत्वेनैव ते पारयन्तोऽन्यदुःखसन्ततिं दृग्गोचरतामानेतुं दयापराः सञ्जायन्ते। उक्तञ्च करुणाद्री हि सर्वस्य सन्तोऽकारणबान्धवाः इति। सुस्वभावसम्पन्ना हि ते आत्मनः प्रतिकूलानि परेषां न समाचरेदिति लक्ष्यमनुवर्तमाना अनुभवति हि मूर्ध्ना पादपस्तीव्रमुष्णं शमयति परितापं छायया संश्रितानाम् इत्युक्तेरादर्शीभूता नानाविधयातना आत्मनानुभूयापि सततं करुणापराः परहितानुष्ठानतत्पराश्च भवन्ति। दया धर्मस्यात्यन्तबलिष्ठभावोऽस्ति। दययैव प्रेरिताः तपःस्वाध्यायपरायणाः निरीहा अपि ऋषयो विश्वकल्याणार्थं बहुविधशास्त्राणि प्रणीतवन्तः। यदि दया न भवेत् तर्हि अद्य अस्मत्समक्षं सन्मार्गप्रवर्तकानां परमकल्याणविधायकानां ज्ञानस्वरूपाणां विविधशास्त्राणां दर्शनमपि न स्यात्। वस्तुतो दयायामेव मानवजीवनस्य साफल्यं निहितमस्ति। यो हि आत्मजे गुरौ भृत्यवर्गे दीने बन्धुवर्गे च दयां न करोति तस्य जीवनं व्यर्थम्। अत एवोक्तं श्रीमद्देवीभागवते-

दया सर्वत्र कर्तव्या दैवाधीनमिदं जगत्।
ईर्ष्यया किं नृपश्रेष्ठ यद्भाव्यं तद्भविष्यति।।[१४]

महात्मनः स्वभावतः परमदयालवो भवन्ति। ते स्वारीनपि क्षमन्ते। वस्तुतः क्षमा दयायाः प्रमुखमङ्गमस्ति। महर्षिः वाल्मीकिः क्षमायाः महत्त्वं प्रतिष्ठापयन् कथयति-

क्षमा दानं क्षमा यज्ञः क्षमा सत्यं हि पुत्रिकाः।।
क्षमा यशः क्षमा धर्मः क्षमया निष्ठितं जगत्।[१५]

धर्मस्य चतुर्थः पादः दानम्। दानमात्मकल्याणस्य सुदृढसाधनमस्ति। दानेन हृदि अवर्णनीयानन्दस्य परमसन्तोषस्य चानुभवो भवति। अनेन शत्रुताया विपक्षताया विद्वेषस्य द्वैतभावस्य ईर्ष्यायाः मात्सर्यस्यासहिष्णुतायाः लोभस्य क्रोधमोहकामादिसकलदुर्गुणानाञ्च विनाशो भूत्वा प्रेम्णः विश्वबन्धुत्वस्य सर्वजनकल्याणादिसकलसदाचाराणां च प्रादुर्भावो भवति। श्रुतिः प्रतिपादयति यद् दानशीला जना अनायासेनैव परमपदस्याधिकारिणः सञ्जायन्ते। श्रीमद्देवीभागवते प्रतिपादितमस्ति यद् यो ब्राह्मणाय भक्तिपूर्वकं गृहं ददाति स गृहरेणुप्रमाणाब्दं यावद् विष्णुलोके महीयते। यो भारतवर्षे सर्वभूताय तडागस्य दानं करोति स जनलोके गत्वा बहुकालपर्यन्तं सुखपूर्वकं निवासं करोति। वापीदानेन ततः शतगुणं फलमवाप्यते। तडागस्य वाप्या वा प्रदानेन यत्पुण्यं प्राप्यते तत्पुण्यं तयोर्जीर्णोद्धारेणाप्यवाप्यते। यः सर्वभूतये पुष्पोद्यानं ददाति स ध्रुवलोको महीयते। यो विमानं दोलमन्दिरं च हरये समर्पयति स मन्वन्तरं यावत् विष्णुलोके गत्वा मोदते। शिबिकादानेन तदर्धं फलं प्राप्यते। पूर्वस्मिन् जन्मनि यद् दत्तमस्ति तदेवास्मिन् जन्मनि उपलभ्यते।[१६]

ब्राह्मणेभ्योऽन्नप्रदाता अन्नप्रमाणवर्षाणि यावत् शिवलोके महीयते। अन्नदानं परमदानमस्ति। अस्य तुलनायां न तु किमपि दानमासीत् न वर्तते न वा भविष्यति। अन्येषां वस्तूनां दाने कालस्य पात्रस्य च परीक्षाया आवश्यकता भवति। परन्तु अन्नदाने न पात्रस्य परीक्षा भवति न वा कालनियमस्य पालनस्यावश्यकता भवति। यस्मै कस्मै यत्र कुत्रापि यस्मिन् कस्मिन् वा समयेऽन्नदानं परमकल्याणाय कल्पते-

अन्नदानं च विप्राय यः करोति च भारते।
अन्नप्रमाणवर्षं च शिवलोके महीयते।।
अन्नदानं महादानमन्येभ्योऽपि करोति यः।
अन्नदानप्रमाणं च शिवलोके महीयते।।

अन्नदानात्परं दानं न भूतं न भविष्यति।
नात्र पात्रपरीक्षा स्यान्न कालनियमः क्वचित्।।[१७]

निष्कर्षतः कथयितुं शक्यते यद् धर्मस्य चत्वारः पादाः वैयक्तिकस्य सामाजिकस्य लौकिकस्य पारलौकिकस्य कल्याणस्य साधकाः सन्ति। धर्मपादेभ्यः अन्तःकरणस्य शुद्धिर्भवति सात्त्विकगुणानाञ्च विकासः भवति। सर्वे भवन्तु सुखिनः सर्वे सन्तु निरामयाः-इति धर्मस्याधारः।

सन्दर्भसङ्केताः

१. श्रीमद्देवीभागवते-४/४/१४-१५
२. तत्रैव-४/४/२३
३. तत्रैव-३/११/३६।
४. श्रीमद्वाल्मीकिरामायणे-२/१०९/१३-१४
५. श्रीमद्देवीभागवते-४/४/४३-४४
६. तत्रैव-४/४/४१-४३
७. तत्रैव-४/४/४४-४७
८. तत्रैव-११/२/१
९. तत्रैव-११/२/२-४
१०. तत्रैव-११/२/६-३३
११. तत्रैव-११/३/७
१२. तत्रैव-३/१५/५७
१३. तत्रैव-३/२२/४२
१४. तत्रैव-३/१७/२८
१५. श्रीमद्वाल्मीकीयरामायणे-१/३३/८
१६. श्रीमद्देवीभागवते-९/२९/५०-६५
१७. तत्रैव-९/३०/२-४

दक्षिणामूर्तिस्तोत्रदिशा जगन्मिथ्यात्वविचारः आत्मस्वरूपविचारश्च

डा. श्रीजित् टी.जी.

श्रीदक्षिणामूर्तिनामकमिदं प्रसिद्धं स्तोत्रं शङ्कराचार्येण कृतमस्ति। इयञ्च रचना स्तोत्रग्रन्थसरण्यामायाति। शङ्कराचार्यस्य ग्रन्थरचनापद्धतिस्तावत् मुख्यतया चतुर्विधा उपलभ्यते। तथा हि भाष्यग्रन्थः, प्रकरणग्रन्थः, तन्त्रग्रन्थः, स्तोत्रग्रन्थश्च। ब्रह्मसूत्रभाष्यादीनां भाष्येऽन्तर्भावः विवेकचूडामण्यादीनां प्रकरणे च। एवं सौन्दर्यलहरी तन्त्रग्रन्थेऽन्तर्भवति।

दक्षिणामूर्त्यष्टकमित्यपरनामधेयं स्तोत्रमिदं दशश्लोकघटितमस्ति। यद्यपि श्लोकसंङ्ख्याविषये दशाऽष्टादशभेदेन विप्रतिपत्तरस्ति तथाऽपि दशश्लोका इत्यत्र सर्वसम्मतिरस्ति। अपि च दक्षिणामूर्तिस्तोत्रोपर्युपलब्धं प्रसिद्धं वार्तिकं यदस्ति मानसोल्लासनामधेयं शङ्कराचार्यशिष्येणैव सुरेश्वराचार्येण कृतं तदपि दशश्लोकानाश्रित्यैवेति दशश्लोका एव इत्यत्र प्रामाणं भवति। दक्षिणामूर्तिरित्यत्र दक्षिणाशब्दः दिग्विषयः तथा सामर्थ्यविषयश्च। स्तोत्रलक्षितः मूर्तिः दक्षिणदिगभिमुखा भवतीति दिग्विषये। सृष्ट्यादिषु दक्षिणा मूर्तिरिति सामर्थ्यविषये च। प्रबन्धोऽयं स्तोत्रस्यास्य तात्पर्यं प्रकाशयन्तं सुरेश्वराचार्यकृतमानसोल्लासवार्तिकमाश्रित्य विचार्यते।

स्तोत्रव्याजेन वेदान्तस्य मर्मभूताः विषयाः उल्लिखिता अत्र। स्तोत्रगतेन प्रथमेन श्लोकेन विश्वस्य ब्रह्मणि अध्यस्तत्वमुक्तम्। द्वितीयेन श्लोकेन ब्रह्मणः जग्त्कारणत्वं प्रतिपाद्यते। तृतीयेन अपुनरावृत्तिरूपं मोक्षं परमेश्वरसाक्षात्करेणैव लभतेति वर्णितम्। चतुर्थेन श्लोकेन आत्मचैतन्येनैव प्रपञ्चोऽयं प्रकाश्यतेत्युक्तम्। मायाविलासव्यामोहः तत्त्वबोधेनैव निवृत्तिमेतीति तदुत्तरत्र पञ्चमे श्लोके निरूपितम्। अवस्थात्रयेऽपि आत्मचैतन्यं अव्ययेन वर्ततेति षष्ठे श्लोके वर्णितम्। आत्मचैतन्यमेवाऽहमित्यन्तः स्फुरतीति सप्तमे उक्तम्। अवस्थात्रयसाक्षिणः चैतन्यस्यैव मायया जीवत्वमित्यष्टमे। जगतः ब्रह्मणोऽनन्यत्वस्य प्रतिपादनमस्ति नवमे। दशमे अस्य स्तवस्य सर्वात्मत्वं फलमिति कथ्यते।

विश्वस्य ब्रह्मणि अध्यस्तत्वम्

विश्वं दर्पणदृश्यमाननगरीतुल्यं निजान्तर्गतम्
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया।
यस्साक्षात्कुरुते प्रबोधसमये स्वात्मानमेवाद्वयम्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।१।।

विश्वमिदं सत्येन भासमानं दर्पणदृश्यमाननगरीतुल्यमस्ति। यथा बहिरनुभूयमानं मनोहरं नगरं कस्मिंश्चित् आदर्शे प्रतिबिम्बते तथा बहिरनुभूयमानं जगदिदं वस्तुतः अन्तरेव वर्तते। मनोदर्पणे प्रतिबम्बतेति। निजान्तर्गतं जगदेव सर्वैरनूभूयते, नतु स्वस्मिन्ननन्तर्गतम्। अन्तर्विद्यमानं जगत् कथं वा बहिर्दृश्यते इति आशङ्कायामुच्यते यथा निद्रया इति। स्वप्नकाले अनुभूयमानं जगत् स्वस्मिन् साक्षिणि अध्यस्ततया भातीति वेदान्तसिद्धान्तः। स्वाप्नमिदं आन्तरं जगत् स्वस्माद्बहिरिव अनुभूयते। एवं स्वस्मिन्नध्यस्तं जाग्रत्प्रपञ्चोऽपि बहिः दृश्यते। स्वप्नदर्शनं अन्तरेव जातमिति प्रबोधकाले अवगन्तुं शक्यते। एवञ्च निजान्तर्गतमेव विश्वं निद्रया बहिर्विषयत्वेन

उद्भूतमिव पश्यन् जाग्रदवस्थायां स्वप्नोपलब्धप्रपञ्चरहितं स्वात्मानमेवाद्वयं साक्षात्कुरुते। स्वप्नकाले यः आत्मा स्वाध्यस्तविश्वदर्शनेन सद्वयः संसारीव लक्षितः स एव प्रबोधकाले विद्यया बाधितविश्वः स्वात्मानमेवाद्वयं साक्षात्कुरुतेति आशयः।

स्वप्नोपलब्धानां गजादिपदार्थानां चैतन्यातिरिक्ता स्वतन्त्रा काचित्सत्ता नास्ति, अध्यस्तपदार्थानां अधिष्ठानसत्तातिरिक्तसत्तायाः अभावात्। रज्जुसर्पस्थले आरोपितसर्पसत्ता न तदधिष्ठानरज्जुसत्तातो भिन्ना, किन्तु अभिन्ना एव। रज्ज्वभावे सर्पस्याप्यभावः इति। रज्जौ विद्यमाना सत्ता एव सर्पेऽपि भासते। स्वप्नप्रपञ्चे बाह्यविषयाणां प्राप्तिः नास्ति, तदुपलम्भकारणानामिन्द्रियाणाम् उपरतत्वात्। स यत्र प्रस्वपित्यस्य लोकस्य सर्वावतो मात्रामपादाय इति [१]श्रुतेः। अतः आरोपितानां स्वाप्नपदार्थानां सत्ता अधिष्ठानसत्तातो न पृथगिति कारणात् सर्वाधिष्ठानभूतात्मसत्तैव स्वप्ने सर्वस्यापि सत्ता।

एवं जाग्रदवस्थायां सर्वैरपि अनुभूयमानस्य प्रपञ्चस्य पृथक् स्वतन्त्रा काचित् सत्ता नास्ति। सर्वे पदार्थाः तदधिष्ठानात्मसत्तया एव सत्तावन्तः भवन्ति। स्वप्नस्थपदार्थानां ज्ञानं आत्मप्रकाशेनैव भवति। स्वस्यैव प्रकाशेन इतरेषां प्रकाशः नतु तेषां स्वयमेव प्रकाशत्वं जडत्वात्। [२]आत्मनैवायं ज्योतिषास्ते, [३]तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति इति तत्र प्रमाणम् । स्वप्नपदार्थानां स्वतस्सत्ता एव नास्तीति तेषां स्वप्रकाशत्वं दूरनिरस्तमेव। निद्रायां येषां पदार्थानामनुभव आसीत् ते प्रबोधसमये नोपलभ्यन्ते। तथैव जाग्रत्काले यस्य प्रपञ्चस्य अनुभवोऽस्ति, उदिते ज्ञाने स चानुभवः नैव भविष्यति।

बीजस्यान्तरिवाङ्कुरो जगदिदं प्राङ्निर्विकल्पं पुन-
र्मायाकल्पितदेशकालकलना वैचित्र्यचित्रीकृतम्।

मायावीव विजृम्भयत्यपि महायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।२।।

सर्वैरपि अनुभूयमानं जगत् तदुत्पत्तेः पूर्वं निर्विकल्पमासीत्। इदानीं जगत् भोक्तृभोग्यादिरूपेण यद्यद्विकल्पसहितं दृश्यते तद्रहितं केवलमात्ममात्रमासीत्। तथा च श्रुतिः [४]"सदेव सोम्येदमग्र आसीत्, आत्मा वा इदमेक एवाग्र आसीत्" इति।

बीजाङ्कुरदृष्टान्तः

जगत् सृष्टेः प्राक् कथमासीदिति बीजाङ्कुरदृष्टान्तेन प्रतिपाद्यते। लोके वृक्षः पल्लवपत्रपुष्पफलशाखादिभिः अत्यन्तं महान् सविकल्पको दृश्यते। किन्तु उत्पत्तेः प्राक् अयं वृक्षः बीजमात्रमासीत्। बीजावस्थायां पत्रपुष्पादिविकल्पाः न सन्ति, निर्विकल्पेन आसीत्। उत्पत्तेः पूर्वं बीजावस्था उत्पत्त्यनन्तरं वृक्षावस्था च। बीजमेव वृक्षरूपेण अभवत्। एवमेव इदं जगदपि सृष्टेः पूर्वं आत्ममात्रमासीत्। सृष्टेः पूर्वं यत् आत्मरूपेण आसीत् स आत्मैव इदानीं जगद्रूपेण वर्तते।

बाह्यसाधनं किञ्चिदाश्रित्यैव लोके कुलालादयः घटादिकमुत्पादयन्ति। सृष्टिपूर्वकाले आत्मा एव आसीदित्युक्तं, सृष्ट्यर्थं बाह्यं किञ्चित् साधनं नैव श्रूयते। अतः कथं जगतः उत्पत्तिरभवदित्याशङ्कायामुच्यते मायाकल्पितमिदं जगदिति। ईश्वरस्यानाद्यनिर्वचनीयमायाशक्त्युपहितस्य स्वेच्छामात्रेण जगदुत्पादकत्वम्।

योगिदृष्टान्तः

बीजात् वृक्षस्योत्पत्तिर्भवति, पुनः वृक्षात् बीजस्योत्पत्तिर्भवति। एवं परस्परकारणत्वेन परम्परा दृश्यते। एवं बीजानां वृक्षाणाञ्चानेकत्वं कल्पनीयं

भवति। तथैव दृष्टान्तोक्तरीत्या जगतः तत्कारणस्य परस्परकारणत्वं अनवस्था च स्यादिति शङ्का भवेत्। एतादृशशङ्कानिराकरणार्थमेव योगिदृष्टान्तस्य वर्णनम्। तदुक्तं मानसोल्लासवार्तिके विश्वामित्रादियोगिनः पूर्वं प्रयोजनमनुद्दिश्यैव स्वेच्छया सर्वभोगोपबृंहितं स्वर्गं निर्मितवन्तः। बाह्यं किञ्चित् साधनमनपेक्ष्यैव एतत्सर्वं ते कृतवन्तः। एवं सर्वस्वतन्त्रः अनन्तशक्तिमानीश्वरः स्वेच्छामात्रेण सकलं सृजत्यवति हन्ति च।

यस्यैव स्फुरणं सदात्मकमसत्कल्पार्थगं भासते
साक्षात्तत्वमसीति वेदवचसा यो बोधयत्याश्रितान् ।
यत्साक्षात्करणाद्भवेन्न पुनरावृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ।।३।।

असत्कल्पार्थगं भासते

प्रत्यगभिन्नस्य परमेश्वरस्य स्वरूपभूतं स्फुरणमेव असत्तुल्यवियदादिपदार्थरूपेण प्रकाशते। असच्छब्देनानिर्वचनीयत्वरूपं मिथ्यात्वमिह विवक्षितं प्रपञ्चस्य शुक्तिरजतवत् दृष्टनष्टस्वरूपत्वात्। प्रत्यगभिन्नस्य परमेश्वरस्य स्फुरणेनैव जगत् प्रकाशते, नतु तस्य स्वतःप्रकाशत्वं जडत्वात्। जगति अनुभूयमानयोः सत्ताप्रकाशयोः अधिष्ठानं जगदिति सर्वे अज्ञानिनः चिन्तयन्ति। वस्तुतः जगतः अधिष्ठानभूतं यत् ब्रह्म अस्ति तन्निष्ठावेव। यथा रज्जौ आरोपितस्य सर्पस्य भानं सत्ता च तदधिष्ठानस्य रज्जुपदार्थस्य भवति नतु आरोपितस्य सर्पस्य। समारोपितस्य अधिष्ठानव्यतिरेकेण स्थितिर्नास्ति। आत्मनि तादात्म्याध्यासात् एव विषयगतसत्तास्फुरणम्। अतः दृश्यप्रपञ्चस्य आत्माधीनसत्तास्फूर्तिकत्वात् तत्र कल्पितत्वमवगम्यते। दर्पणं बिम्बव्यतिरिक्ततया उपलभ्यते किन्तु आत्मव्यतिरिक्ततया न घटाद्युपलब्धिरिति घटादेः पृथक्सत्ताराहित्यमवगम्यते। एवं स्वतस्सत्वप्रकाशरहितं जगत् तदधिष्ठानभूतात्मसत्ताप्रकाशाभ्यामेव

सत्ताप्रकाशवद्भवतीति तात्पर्यम्। जडत्वात् अस्य प्रपञ्चस्य मिथ्यात्वमपि बोध्यम्। एवञ्च विमतं मिथ्या जडत्वात् शुक्तिरूप्यवत् इत्यनुमानं सम्भवति। जडत्वञ्चात्र अस्वप्रकाशत्वं ज्ञेयम्। यो पुरुषः प्रपञ्चमिथ्यात्वमवगम्य परमेश्वरमवलम्बते सः तत्त्वमस्यादिवाक्यजन्याखण्डधीद्वारा अपुनावृत्तिरूपं[५] मोक्षमवाप्नोति।

नानाच्छिद्रघटोदरस्थितमहादीपप्रभाभास्वरम्
ज्ञानं यस्य तु चक्षुरादिकरणद्वारा बहिस्स्पन्दते।
जानामीति तमेव भान्तमनुभात्येतत्समस्तं जगत्
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।४।।

अनेकरन्ध्रयुक्तस्य घटस्य अन्तः वर्तमानः महादीपः यथा रन्ध्रैर्द्वारा बहिस्स्थितान् पदार्थान् प्रकाशयति। तथैव घटवदनेकच्छिद्रयुक्ते देहे अन्तःकरणे प्रतिबिम्बितं चैतन्यं चक्षुरादिकरणद्वारा बहिर्विषयदेशमागत्य तान् भासयति। तदा एव घटपटादिविषयान् अहं जानामीति व्यवहारः सम्पद्यते। घटमहं जानामीत्यत्र ज्ञानस्य विषयो भवति घटः। घटज्ञानस्य कारणं भवति आत्मप्रकाशः। अहमिदं जानामीति स्वीयप्रकाशेन घटादिसर्वमपि विषयं प्रकाशयन् यः स्वयं प्रकाशते तमनुसृत्य कृस्नोऽपि प्रपञ्चः [६]प्रकाशते। अतः प्रपञ्चः परप्रकाश्यत्वादेव मिथ्या भवति। एवमेव विषयस्य सत्त्वमपि पराधीनमेव। यद्यत् सर्वदा नोपलभ्यते तत्सर्वं शुक्तिरजतादिवत् [७]स्वतन्त्रसत्ताहीनं भवति। स्वमते आरोपितस्य पदार्थस्य स्वतन्त्रा काचित् सत्ता नास्ति। अधिष्ठानगता सत्ता एव आरोपितपदार्थेपि आरोप्यते अथवा भासते। अधिष्ठानसत्तातिरिक्तायाः आरोपितसत्ताया अनङ्गीकारात्। तथापि घटः सन्निति प्रत्यक्षसिद्धः लौकिको व्यवहारः ब्रह्मैक्याध्यासादेव, ब्रह्मणः जगदध्यासाधिष्ठानत्वात्। ब्रह्मणः जगदुपादानत्वे [८]श्रुतिर्हि मानम्।

देहं प्राणमपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्रीबालान्धजडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः।
मायाशक्तिविलासकल्पितमहाव्यामोहसंहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।५।।

आत्मनोऽन्यत्र आत्मदृष्टिः

अल्पज्ञाः देहादिषु आत्मत्वबुद्धिं परिकल्पयन्ति। तत्र केचन प्राणस्य आत्मत्वं वदन्ति अन्ये तु चक्षुरादीन्द्रियाणामात्मत्वं वदन्ति, अपरे तु शून्यस्य च वदन्त्यात्मत्वम्। मायाशक्तिविलासात् आत्मनोऽन्यत्र सर्वत्रैव आत्मत्वं पश्यन्ति अविवेकिनः। एवञ्च अहम्पदवाच्याः देहप्राणादय इति एते चिन्तयन्ति। भ्रान्तिरियं परमेश्वरानुग्रहेणैव निवर्तते।

देहादीनामात्मत्वं कथञ्चिदपि नोपपद्यते पाषाणवदचेतनत्वात्। देहादयः परप्रकाश्याः जडाः सन्ति यथा पाषाणः। अतः जडत्वसामान्यात् देहादयः अनात्मान एव। मूर्च्छासुषुप्तिमरणावस्थासु देहः चैतन्यविहीनतया उपलभ्यतेति स आत्मव्यतिरिक्त इत्यवगम्यते। एवमिन्द्रियाण्यपि नात्मा करणत्वात्। चक्षुरादीन्द्रियाणि रूपादिग्रहणसाधनानि सन्तीति करणत्वात् तेषामनात्मत्वम्। इन्द्रियाणामात्मत्वाङ्गीकारे मूकोहं बधिरोहमित्यादिवाक्यं ये वदन्ति ते निरात्मका इति वक्तव्यमापतति, तन्नोपपद्यते। सुषुप्तौ ज्ञानाभावात् प्राणोऽपि नात्मा। बुद्ध्यादीनां संघात आत्मा इत्यप्यसङ्गतम्। विनष्टे कस्मिन्श्चिदवयवे संघातनाशात् आत्मापि विनष्ट इत्यापातात्।

राहुग्रस्तदिवाकरेन्दुसदृशो मायासमाच्छादनात्
सन्मात्रः करणोपसंहरणतो योऽभूत्सुषुप्तः पुमान्।
प्रागस्वाप्समिति प्रबोधसमये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।६।।

जीवस्य सन्ति खलु तिस्रः अवस्थाः। तथा च जाग्रत्स्वप्नसुषुप्तिनामधेयाः। सुषुप्तिकाले आत्मा सन्मात्रेणावतिष्ठते। तदा च विज्ञानहेतुभूतानि इन्द्रियाणि उपसंहृता इति कारणात् निर्विशेषेण भासते। सुषुप्तिकालेऽपि तस्य स्पष्टप्रकाशः नास्ति, मायायाः आवरणात्। यथा राहुग्रस्तौ सूर्यचन्द्रौ स्पष्टं न प्रकाशेते। मायोपाधिकः सन्नेव सुषुप्तौ वर्तते। अयमेव मुक्तात्मनः सुषुप्तात्मनश्च भेदः। यद्यपि उभयत्राऽपि लयः ज्ञायते तथाऽपि सुषुप्तिलयः अविद्योपाधिसहितस्य आत्मनः मुक्तिलयस्तावत् अविद्योपाधिरहितस्य चेति विशेषः।

सूर्यचन्द्रयोः राहुणा ग्रस्तत्वेऽपि सत्वमस्ति। तच्च सर्वैरपि अनुभूयते। एवं सुषुप्तिकाले मायाग्रस्तस्य आत्मनः सत्वं केनाऽपि नोपलभ्यतेति तत्कालीनसत्त्वं कथमवगन्तुं शक्यतेति शङ्का जायेत। तन्निराकरणार्थमुक्तं सुप्तोत्थितस्य प्रागस्वाप्समिति स्मरणम्। सुषुप्त्यनन्तरं उत्थितः पुरुषः आत्मनः सुखस्वरूपत्वं स्मरति सुखमहमस्वाप्समिति। योऽहं अस्वाप्सं स इदानीं जागर्मीति प्रत्यभिज्ञा च भवति। नहि तदाननुभूतस्य प्रत्यभिज्ञानं सम्भवति।

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्त्तमानमहमित्यन्तःस्फुरन्तं सदा।
स्वात्मानं प्रकटीकरोति भजतां यो भद्रया मुद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।७।।

बाल्यकौमारयौवनाद्यवस्थासु व्यावृत्तासु व्यक्तिः नैव भिद्यते। योऽहं पूर्वं बालः आसम् सोऽहमिदानीं बृद्धोस्मीति सर्वास्ववस्थासु अनुवर्तमानोऽनुभूयते। यथा कुसुमेषु सूत्रानुगतिः। एवमेव जाग्रदाद्यवस्थात्रये व्यावृत्तमानेऽपि सर्वत्र अवस्थात्रयसाक्षी आत्मा नैव भिद्यते। योऽहं सुषुप्तौ आसं स्वप्नञ्चाद्राक्षं सोऽहमिदानीं जागर्मीति अनुभूयते। अयमनुभवः [१]प्रत्यभिज्ञेति कथ्यते।

अनेकजन्मस्वपि प्राप्तदेहेषु आत्मा नैव भिद्यते। अत एव पूर्वजन्मस्मृत्या शिशोः [१०]स्तन्यपानम् उपपद्यते। मृगबालकः सद्यो जातः तस्मिन्नेव समये पूर्वजन्मानुभूतार्थस्मरणात् स्वमातुः स्तन्यपानाय स्वयमेव प्रवर्तते। [११]पूर्वानुभूतविषयसंस्कारवशात् तत्सजातीयदर्शने पूर्वानुभूतं स्मृत्वा तथा व्यवहरति।

विश्वं पश्यति कार्यकारणतया स्वस्वामिसम्बन्धतः
शिष्याचार्यतया तथैव पितृपुत्राद्यात्मना भेदतः।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।८।।

इह श्लोके पूर्वोक्तस्य कृत्स्नस्य शास्त्रार्थस्योपसंहारः क्रियते। पारमार्थिकदृष्ट्या कालत्रयेपि ब्रह्मव्यतिरेकेण भूतभौतिकपदार्थानामभावे बन्धमोक्षादिव्यवस्था तदुपदेशादिकञ्च कथमित्याशङ्कां वारयत्यत्र। परमार्थतो आत्मव्यतिरेकेण भौतिकपदार्था न सन्ति तथापि ईश्वरः स्वमायाशक्त्या सर्वमभवत्। तस्यैव शक्तिः विविधरूपेण दृश्यते। उपास्योपासकरूपेण, गुरुशिष्यरूपेण, स्वामिभृत्यभेदेन च वास्तविकभेदाभावेपि ईश्वरः स्वेच्छया [१२]क्रीडति। यथा स्वप्नप्रपञ्चः कालत्रयेपि वस्तुतः नास्ति तथैव शिष्याचार्यरूपो भेदप्रपञ्चोपि कालत्रयेपि नास्ति। किन्तु मायया सर्वं प्रतीयते। मायाप्रयुक्तभेदमादाय बन्धमोक्षादिव्यवहारः सम्भवति च। भेदप्रतीतिः मायया आत्मनि कल्पिता एव। [१३]आत्मानमनुपद्रुत्यैव समस्तमपि जगत् मायया करोति, यथा अणुमात्रेणापि गुणो दोषो वा सर्पत्वकल्पनया रज्जौ न भवति। मायाधीनः सन् परमेश्वर एव शिष्याचार्यभेदेन पितृपुत्रभेदेन च अनुभूयते। यद्यपि ब्रह्मभिन्नं परमार्थतो किमपि नास्ति, तथापि अनाद्यविद्याविलासेन भ्रान्तः जीवः प्रपञ्चं बहुभेदभिन्नं पश्यति। ब्रह्मविद्याप्राप्तौ ध्वस्ताविद्यः सन् स्वीये रूपे चैतन्ये अवतिष्ठते।

तत्र शङ्कान्तरमुदेति मायाप्रयुक्तभेदस्य मिथ्यात्वात्, मिथ्याभूतशास्त्राद् सत्यत्वावगतिः कथमिति। यथा अदेवतायां प्रतिमायां आरोपिता देवता पूजकस्य सत्यरूपं फलं प्रयच्छति, एवं चित्रव्याघ्रादिः बालस्य सत्यभयादिहेतुः भवति, तथैव मिथ्याभूतं शास्त्रमपि सत्यं ब्रह्म बोधयेत्। [१४]तदुक्तमुल्लासे मिथ्याभूतोपि वेदान्तस्सत्यमर्थं प्रबोधयेत् इति।

भूरम्भांस्यनलोऽनिलाम्बरमहर्नाथो हिमांशुः पुमा-
नित्याभाति चराचरात्मकमिदं यस्यैव मूर्त्यष्टकं ।
नान्यत् किञ्चन विद्यते विमृशतां यस्मात् परस्मात् विभो
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये।।९।।

प्रतीयमानः समस्तोऽपि भेदः ईश्वरशक्तिमायाकल्पित इति निरूपितं पूर्वं। सा च माया कथं वा निवर्त्यतेति उपायान्वेषणे तदुत्तरमुच्यतेत्र। तत्रोपोयो उच्यते ईश्वरोपासना इति। मन्दाधिकारिणां कृते क्रममुक्तिदायकं अष्टमूर्त्युपासनमुच्यते। परमेश्वर एव सर्वपदार्थरूपेणावतिष्टते। अष्टमूर्तिरीश्वर इति ख्यातिरस्ति। तथा च पञ्चभूतानि सूर्यचन्द्रौ तथा जीवश्चेति। एतत्सर्वं ब्रह्मणोऽभिन्नतया वर्तते। यदेव ब्रह्म प्रागुत्पत्तौ आसीत् तदेव चराचरात्मकजगद्रूपेण भासते। यथा शुक्तिरेव रजतरूपेण भासते। अत्र परमेश्वरस्य सर्वात्मत्वमुच्यते।

सर्वात्मत्वमिति स्फुटीकृतमिदं यस्मादमुष्मिन् स्तवे
तेनास्य श्रवणात् तदर्थमननाद्ध्यानाच्च सङ्कीर्तनात्।
सर्वात्मत्वमहाविभूतिसहितं स्यादीश्वरत्वं स्वत-
स्सिध्येत्तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम्।।१०।।

पूर्वत्र श्लोके आत्मतत्वप्राप्त्यर्थानि साधनानि निरूपितानि। सम्प्रति यथोक्तसाधनसम्पन्नस्य तत्त्वज्ञानेन कीदृशः लाभः लभ्यतेति फलकथनात्मको भवत्ययं श्लोकः। अस्य स्तवस्य सर्वात्मत्वं फलमिति। देहाभिमाननिमित्तं

उत्पन्नो यो अहंभावः परिच्छिन्नः तन्निराकृत्य पूर्णाहंभावलाभप्राप्तिरिति तात्पर्यम्। निर्विकल्पापरिच्छिन्नात्मभाव एव पूर्णाहन्ता। इदमेव मुख्यं फलं भवति। उपासनेन पुत्रपौत्राद्यवान्तरं फलमपि भवति। पाके प्रवर्तमानस्य शैत्यपरिहार इव फलमिदं [१५]प्रासङ्गिकं भवति। उपासनया यदा ईश्वरत्वप्राप्तिर्भवति तदा ईश्वराभिन्नतया वर्तमानस्य ऐश्वर्यस्यापि प्राप्तिर्भवति। ईश्वरत्वप्राप्तौ तदंशभूताणिमाद्यष्टसिद्धयः[१६]

"अणिमा महिमा चैव गरिमा लघिमा तथा। प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः"।।

टिप्पणीः

१ बृहदारण्यकोपनिषत्-६.३.९

२ बृहदारण्यकोपनिषत्-६.३.६

३ मुण्डकोपनिषत्- २.२.११

४ छान्दोग्योपनिषत्-६.२.१

५ न स पुनरावर्तते (छान्दोग्योपनिषत्-८.१५.१)

६ तस्य भासा सर्वमिदं विभाति (मुण्डकोपनिषत्- २.२.१०)

७ विमता भावा न स्वतस्सत्तावन्तः कदाचिदेवोपलभ्यमानत्वात् शुक्तिरजतादिवत् (मानसोल्लासवृत्तान्तः ४.३.)

८ बहु स्यां प्रजायेय, सच्च त्यच्चाभवत् (तैत्तिरीयोपनिषत्-२.६)

९ पूर्वं भातस्य साम्प्रतं भासमानस्य कस्यचित् सोऽयमित्यनुसन्धानं प्रत्यभिज्ञानम् (मानसोल्लासवृत्तान्तः-७.३)

१० पूर्वजन्मानुभूतार्थस्मरणान्मृगशाब्रकः जननीस्तन्यपानाय स्वयमेव प्रवर्तते(मानसोल्लासः-७.६)

११ पूर्वानुभूतविषयसंस्कारवशादनुभूतसजातीयदर्शने पूर्वानुभूतविषयस्वभावं स्मरन् परिदृश्यमानविषयेपि तज्जातीयत्वेन लिङ्गेनास्यापि तादृक्स्वभावतां कल्पयन्

उभयवस्त्वनुभवकालानपायिनमेकमात्मानं प्रत्यभिजानाति पुमानिति (मानसोल्लासवृत्तान्तः-७.७)

[१२] लोकवत्तु लीलाकैवल्यम् (ब्रह्मसूत्रम्-२.२.३३)

[१३] कूटस्थमनुपद्रुत्य करोति जगदादिकं, दुर्घटैकविधायिन्यां मायायां का चमत्कृतिः (पञ्चदशी-६.१३४)

[१४] मानसोल्लासः-८.११

[१५] पाके प्रवर्तमानस्य शीतादिपरिहारवत्। प्रासङ्गिकाश्च सिद्ध्यन्ति स्तोत्रेणानेन सर्वदा। (मानसोल्लासः-१०.३)

[१६] अणिमा महिमा चैव गरिमा लघिमा तथा। प्राप्तिः प्राकाम्यमीशित्वं वशित्वं चाष्टसिद्धयः।। (मानसोल्लासः-१०.८)

अनुशीलितग्रन्थसूची

संस्कृतग्रन्थाः

१. दक्षिणामूर्तिस्तोत्रम् (स्वयंप्रकाशयतिविरचितया तत्त्वसुधाख्यया व्याख्यया सहितम्,मानसोल्लासापरनामधेयेन सुरेश्वराचार्यनिर्मितेन वार्तिकेन तद्व्याख्यानेन च मानसोल्लासवृत्तान्ताभिधेन रामतीर्थपरिकलितेन समुल्लसितम्) -श्रीशङ्कराचार्यः- Government Branch Press, Mysore-१८९५

२. ब्रह्मसूत्रशाङ्करभाष्यम्-श्रीशङ्कराचार्यः-चौखम्भा संस्कृतभवन-वाराणसी-२००४

३. छान्दोग्योपनिषत्-गीताप्रेस्-गोरखपुर्-१९९५

४. तैत्तिरीयोपनिषत्-गीताप्रेस्-गोरखपुर्-१९९०

५. वेदान्तपरिभाषा-धर्मराजाध्वरीन्द्रः-परिमल् पब्लिकेशन्स-दिल्ली-२०१३

६. मुण्डकोपनिषत्-गीताप्रेस्-गोरखपुर्-२०००

७. पञ्चदशी-विद्यारण्यस्वामी-चौखम्बा विद्याभवन-वाराणसी-२००८

८. बृहदारण्यकोपनिषत्-गीताप्रेस्-गोरखपुर्-१९९२

मलयालग्रन्थः

१. दक्षिणामूर्तिस्तोत्रम्-मृडानन्दस्वामिनः-श्रीरामकृष्णमठम्-तृश्शूर्-२०००

Regd. No. KERBIL/1999/1650



यज्ञं दधे सरस्वती

SUKṚTĪNDRA ORIENTAL RESEARCH INSTITUTE

Registered under the Travancore Cochin Literary Scientific and Charitable Societies Registration Act (Regn. No. ER7 of 1972)

Kuthapady, Thammanam, Kochi - 682 032
Kerala, India

Sukṛtīndra Oriental Research Institute is a research foundation founded in 1971 by **His Holiness Shrimad Sudhindra Tirtha Swamiji**, Twentieth Mathadhipati of Shri Kashi Math Samsthan, Varanasi. The Chief Patron of this Institute is **His Holiness Shrimad Samyamindra Tirtha Swamiji,** Twenty first Mathadhipati of Shri Kashi Math Samsthan.

The main objective of this Institute is to promote the study and research in Oriental learning, in particular Indological subjects like Sanskrit, Indian Culture, Literature, History, Philosophy, Arts and Architecture and so on. The Institute is a Research Centre recognised by the University of Kerala and Mahatma Gandhi University. It has a Reference Library containing Indological books and a Manuscript Library containing several palm-leaf manuscripts in Sanskrit. Its activities include guiding research in Sanskrit, taking up research projects, publishing books and a research journal, conducting seminars, and offering diploma courses.

For further details, contact
Hon. Director

Printed and published by Dr. V. Nithyanantha Bhat, Sree Niketan, Jew Street, Ernakulam, Kochi - 682 035 at Sukṛtīndra Oriental Research Institute, Kuthapady, Thammanam, Kochi - 682 032, Kerala, India. Printed at Green Offset Printing Press, Ayyappankavu, Kochi - 682 018. Editor : Dr. V. Nithyanantha Bhat.

ISSN 2229-3337

